# श्रीमद्भगवद्गीता - प्रथमोऽध्यायः

## अर्जुन विषाद योगः

**धृतराष्ट्र उवाच**

धर्मक्षेत्रे कुरुक्षेत्रे समवेता युयुत्सवः ।
मामकाः पाण्डवाश्चैव किमकुर्वत सञ्जय ॥1॥

**सञ्जय उवाच**

दृष्ट्वा तु पाण्डवानीकं व्यूढं दुर्योधनस्तदा ।
आचार्य मुपसङ्गम्य राजा वचन मब्रवीत् ॥2॥

पश्यैतां पाण्डु पुत्राणाम् आचार्य महतीं चमूम् ।
व्यूढां द्रुपद पुत्रेण तव शिष्येण धीमता ॥3॥

अत्र शूरा महेष्वासाः भीमार्जुन समा युधि ।
युयुधानो विराटश्च द्रुपदश्च महारथः ॥4॥

धृष्टकेतु श्चेकितानः काशिराजश्च वीर्यवान् ।
पुरुजित् कुन्तिभोजश्च शैब्यश्च नर पुङ्गवः ॥5॥

युधामन्युश्च विक्रान्तः उत्तमौजाश्च वीर्यवान् ।
सौभद्रो द्रौपदेयाश्च सर्व एव महारथाः ॥6॥

अस्माकं तु विशिष्टा ये तान्निबोध द्विजोत्तम ।
नायका मम सैन्यस्य सञ्ज्ञार्थं तान् ब्रवीमि ते ॥7॥

भवान् भीष्मश्च कर्णश्च कृपश्च समितिञ्जयः ।
अश्वत्थामा विकर्णश्च सौमदत्ति स्तथैव च ॥8॥

अन्ये च बहवः शूराः मदर्थे त्यक्त जीविताः ।
नानाशस्त्र प्रहरणाः सर्वे युद्ध विशारदाः ॥9॥

अपर्याप्तं तदस्माकं बलं भीष्माभि रक्षितम् ।
पर्याप्तं त्विद मेतेषां बलं भीमाभि रक्षितम् ॥10॥

अयनेषु च सर्वेषु यथाभाग मवस्थिताः ।
भीष्ममेवाभि रक्षन्तु भवन्तः सर्व एव हि ॥11॥

तस्य सञ्जनयन् हर्षं कुरुवृद्धः पितामहः ।
सिंहनादं विनद्योच्चैः शङ्खं दध्मौ प्रतापवान् ॥12॥

ततः शङ्खाश्च भेर्यश्च पणवानक गोमुखाः ।
सहसैवाभ्य हन्यन्त स शब्द स्तुमुलोऽभवत् ॥13॥

ततः श्वेतैर्हयै र्युक्ते महति स्यन्दने स्थितौ ।
माधवः पाण्डवश्चैव दिव्यौ शङ्खौ प्रदध्मतुः ॥14॥

पाञ्चजन्यं हृषीकेशः देवदत्तं धनञ्जयः ।
पौण्ड्रं दध्मौ महाशङ्खं भीमकर्मा वृकोदरः ॥15॥

अनन्त विजयं राजा कुन्तीपुत्रो युधिष्ठिरः ।
नकुलः सहदेवश्च सुघोषमणि पुष्पकौ ॥16॥

काश्यश्च परमेष्वासः शिखण्डी च महारथः ।
धृष्टद्युम्नो विराटश्च सात्यकि श्चापराजितः ॥17॥

द्रुपदो द्रौपदेयाश्च सर्वशः पृथिवीपते ।
सौभद्रश्च महाबाहुः शङ्खान्-दध्मुः पृथक् पृथक् ॥18॥

स घोषो धार्तराष्ट्राणां हृदयानि व्यदारयत् ।
नभश्च पृथिवीं चैव तुमुलो व्यनुनादयन् ॥19॥

अथ व्यवस्थितान्-दृष्ट्वा धार्तराष्ट्रान् कपिध्वजः ।
प्रवृत्ते शस्त्र सम्पाते धनु रुद्यम्य पाण्डवः ॥20॥

हृषीकेशं तदा वाक्यम् इदमाह महीपते ।

**अर्जुन उवाच**

सेनयोरुभयो र्मध्ये रथं स्थापय मेऽच्युत ॥21॥

यावदेता न्निरीक्षेऽहं योद्धुकामा नवस्थितान् ।
कैर्मया सह योद्धव्यं अस्मिन् रण समुद्यमे ॥22॥

योत्स्यमानानवेक्षेऽहं य एतेऽत्र समागताः ।
धार्तराष्ट्रस्य दुर्बुद्धेः युद्धे प्रिय चिकीर्षवः ॥23॥

**सञ्जय उवाच**

एवमुक्तो हृषीकेशः गुडाकेशेन भारत ।
सेनयोरुभयो र्मध्ये स्थापयित्वा रथोत्तमम् ॥24॥

भीष्मद्रोण प्रमुखतः सर्वेषां च महीक्षिताम् ।
उवाच पार्थ पश्यैतान् समवेतान् कुरूनिति ॥25॥

तत्रापश्यत् स्थितान् पार्थः पितृनथ पितामहान् ।
आचार्यान्-मातुलान्-भ्रातृन् पुत्रान्-पौत्रान्-सखींस्तथा ॥26॥

श्वशुरान्-सुहृदश्चैव सेनयो रुभयोरपि ।
तान्समीक्ष्य स कौन्तेयः सर्वान्बन्धू नवस्थितान् ॥27॥

कृपया परयाऽऽविष्टः विषीदन्निद मब्रवीत् ।

**अर्जुन उवाच**

दृष्ट्वेमं स्वजनं कृष्ण युयुत्सुं समुपस्थितम् ॥28॥

सीदन्ति मम गात्राणि मुखं च परिशुष्यति ।
वेपथुश्च शरीरे मे रोमहर्षश्च जायते ॥29॥

गाण्डीवं स्रंसते हस्तात् त्व क्चैव परिदह्यते ।
न च शक्नोम्य वस्थातुं भ्रमतीव च मे मनः ॥30॥

निमित्तानि च पश्यामि विपरीतानि केशव ।
न च श्रेयोऽनुपश्यामि हत्वा स्वजन माहवे ॥31॥

न काङ्क्षे विजयं कृष्ण न च राज्यं सुखानि च ।
किं नो राज्येन गोविन्द किं भोगै र्जीवितेन वा ॥32॥

येषामर्थे काङ्क्षितं नः राज्यं भोगाः सुखानि च ।
त इमेऽवस्थिता युद्धे प्राणांस् त्यक्त्वा धनानि च ॥33॥

आचार्याः पितरः पुत्राः तथैव च पितामहाः ।
मातुलाः श्वशुराः पौत्राः श्यालाः सम्बन्धिनस्तथा ॥34॥

एतान्न हन्तु मिच्छामि घ्नतोऽपि मधुसूदन ।
अपि त्रैलोक्य राज्यस्य हेतोः किं नु महीकृते ॥35॥

निहत्य धार्तराष्ट्रान्नः का प्रीतिः स्याज्जनार्दन ।
पाप मेवाश्रये दस्मान् हत्वैता नाततायिनः ॥36॥

तस्मान्नार्हा वयं हन्तुं धार्तराष्ट्रान् स्वबान्धवान् ।
स्वजनं हि कथं हत्वा सुखिनः स्याम माधव ॥37॥

यद्यप्येते न पश्यन्ति लोभोपहत चेतसः ।
कुलक्षय कृतं दोषं मित्रद्रोहे च पातकम् ॥38॥

कथं न ज्ञेय मस्माभिः पापादस्मा न्निवर्तितुम् ।
कुलक्षयकृतं दोषं प्रपश्यद्भिर् जनार्दन ॥39॥

कुलक्षये प्रणश्यन्ति कुलधर्माः सनातनाः ।
धर्मे नष्टे कुलं कृत्स्नम् अधर्मोऽभि भवत्युत ॥40॥

अधर्माभि भवात्कृष्ण प्रदुष्यन्ति कुलस्त्रियः ।
स्त्रीषु दुष्टासु वार्ष्णेय जायते वर्ण सङ्करः ॥41॥

सङ्करो नरकायैव कुलघ्नानां कुलस्य च ।
पतन्ति पितरो ह्येषां लुप्त पिण्डोदक क्रियाः ॥42॥

दोषैरेतैः कुलघ्नानां वर्ण सङ्कर कारकैः ।
उत्साद्यन्ते जाति धर्माः कुल धर्माश्च शाश्वताः ॥43॥

उत्सन्न कुल धर्माणां मनुष्याणां जनार्दन ।
नरकेऽनियतं वासः भवतीत्यनु शुश्रुम ॥44॥

अहो बत महत्पापं कर्तुं व्यवसिता वयम् ।
यद्राज्य सुख लोभेन हन्तुं स्वजन मुद्यताः ॥45॥

यदि मामप्रतीकारम् अशस्त्रं शस्त्र पाणयः ।
धार्तराष्ट्रा रणे हन्युः तन्मे क्षेमतरं भवेत् ॥46॥

**सञ्जय उवाच**

एवमुक्त्वाऽर्जुनः सङ्ख्ये रथोपस्थ उपाविशत् ।
विसृज्य सशरं चापं शोक संविग्न मानसः ॥47॥

॥ ॐ तत्सदिति श्रीमद्भगवद्गीतासु उपनिषत्सु ब्रह्मविद्यायां
योगशास्त्रे श्रीकृष्णार्जुन संवादे अर्जुन विषाद योगो नाम प्रथमोऽध्यायः ॥